# ॥ श्रीमद्राधादेव्या नाम्नामष्टादशशती ॥

.. 1800 names of Radha ..

sanskritdocuments.org

August 20, 2017

# .. 1800 names of Radha ..

# ॥ श्रीमद्राधादेव्या नाम्नामष्टादशशाती ॥

## Sanskrit Document Information

Text title : rAdhAnAmnAmaShTAdashashatI

File name : rAdhAnAmnAmaShTAdashashatI.itx

Category : devii, radha

Location : doc_devii

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Shri Devi Kumar, refined by PSA Easwaran

Proofread by : PSA Easwaran psaeaswaran at gmail

Description-comments : 1800 names for Radha from Krishnayamala mahAtantra

Source : shrIkriShNayAmale mahAtantre chaturvisho.adhyAyaH

Acknowledge-Permission: Mahaperiyaval Trust

Latest update : November 6, 2014

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ श्रीमद्राधादेव्या नाम्नामष्टादशशती ॥

(श्रीकृष्णयामले महातन्त्रे)
चतुर्विंशोऽध्यायः
ब्राह्मण उवाच
ततः सा त्वरया वृन्दा दासी कृष्णस्य योगिनी ।
सम्मुखस्था महादेव्या गृहीत्वा करपङ्कजम् ।
अपृच्छन्मधुरालापा तन्नाम चरितानि च ॥ १॥

वृन्दा उवाच
किं ते नाम महादेवि तन्मे कथय सुव्रते ।
मया त्वं कृत्ययाविष्टा लक्ष्यसे मन्दगामिनि ॥ २॥

श्रुतमस्ति मया किञ्चित्तदाकर्णय सुव्रते ।
परब्रह्मस्वरूपस्य कृष्णस्याऽद्भुतरूपिणः ॥ ३॥

देहाद्विनिर्गता पूर्वं राधिका सकलाधिका ।
तां दृष्ट्वा रूपिणीं देवीं स्वयं कृष्णो मुमोह सः ॥ ४॥

ततस्तुष्टाव विकलो राधा राधेति जल्पकः ।
तामेव नीलराजीवलोचनीं शोकमोचनीम् ॥ ५॥

ततः सा च महादेवी भुवनेश्याऽवरोधिता ।
कृष्णदेहोद्भवाऽप्यद्य रतिभीताऽद्रवत् क्षणात् ॥ ६॥

हस्तप्राप्तां च तां देवीं न स जग्राह केशवः ।
प्रेमभङ्गभयात् साऽपि ततश्चान्तर्दधे क्षणात् ॥ ७॥

अन्तर्हितायां राधायां तत्कामासक्तचेतनः ।
चिन्तयामास विश्वात्मा कथं मद्वशगा भवेत् ॥ ८॥

अपूर्वरूपसम्पन्ना नवयौवनगर्विणी ।
तत्र चिन्तयतस्तस्य कृष्णस्य परमात्मनः ॥ ९॥

देहादाविर्बभूवाऽसौ परब्रह्मस्वरूपिणी ।
समस्तलोकजननी श्रीमत्त्रिपुरसुन्दरी ॥ १०॥

यथा कृष्णे न भेदोऽस्ति परमानन्दरूपिणी ।

बहुरूपा च सा देवी ततो जाताः सहस्रशः ॥ ११॥

अनङ्गकुसुमाद्याश्च नित्यलीला महाबलाः ।
नानारूपधराः सर्वा नानाशक्तिसमन्विताः ॥ १२॥

अन्वेषणाय राधायाः प्रेषिता विश्वरूपया ।
राधया चापि ताः सर्वा निर्जिता निजमायया ॥ १३॥

तच्छ्रुत्वा त्रिपुरादेवी योगिनी त्रिपुरातनी ।
चकार कर्म तद्दिव्यं मन्त्रमुद्रासमन्वितम् ॥ १४॥

संक्षोभणं द्रावणं च वश्याकर्षणमादनम् ।
त्रिखण्डाद्या मुद्रिकाश्च वश्यकर्मकुतूहलाः ॥ १५॥

याभिर्विरचिताभिश्च का स्त्री न स्याद्वशङ्गता ।
मायया मोहिता याश्च उन्माद्यन्त्यो मनस्विनि ॥ १६॥

न जाने कीदृशी तासां गतिर्भवति शोभने ।
त्रिपुरा त्रिजगद्धात्री साक्षाद्या भगवत्तनुः ॥ १७॥

तया विरचिता माया न कस्या वा हरेन्मनः ।
न जाने कासि देवी त्वं किं ते नाम प्रकाश्यताम् ॥ १८॥

नवलावण्यवश्याभिः समाप्लावितविग्रहाः ।
न क्वापि कापि मे दृष्टा सृष्टाविह विहारिणी ॥ १९॥

ब्राह्मण उवाच
इत्युक्ता सा महादेवी कृष्णदेवस्य वल्लभा ।
वाणीं सुमधुरां कान्तामकरोदतिथिं मुखे ॥ २०॥

श्रीराधिका उवाच
न जानामि कुतो जाता कस्मादत्र समागता ।
किं मे नाम न जानामि स्वभावचपलाऽस्म्यहम् ॥ २१॥

एकं स्मरामि पुरुषं श्यामलं पुरुषाकृतिम् ।
तत्कटाक्षबाणभिन्नहृदया हृदयाम्बुजे ॥ २२॥

रिरंसुरपि तं दूरे भयात् प्रथमसङ्गमे ।
दैवादहं गता दूरे नीपमूलादिति स्मरे ॥ २३॥

ब्राह्मण उवाच
ततो वृन्दा भगवती भूयः प्रोवाच कामिनी ।
तामेव राधिकां देवीं प्रणयाविष्टमानसा ॥ २४॥

वृन्दा उवाच
कथयस्व महेशानि नाम किं ते सुखावहे ।
रूपं दृष्ट्वा मोहितायै मह्यं शुश्रूषवे परम् ॥ २५॥

रूपमीदृङ्नाम कीदृक् सुधासहचरं भवेत् ।
इति व्याकुलिताया मे सत्यमान्दोलितं मनः ॥ २६॥

करुणाकरुणापूर्णमरुणायतलोचने ।
यद्यस्ति कुरु चेतस्त्वं मम शोकविमोचने ॥ २७॥

श्रीराधिका उवाच
शृणु ते कथयिष्यामि वृन्दे वृन्दारवन्दिते ।
अष्टादशशतीं नाम्नां वेदागमसुगोपिताम् ॥ २८॥

पवित्रां परमां पुण्यां पापसंहारकारिणीम् ।
श्रीकृष्णविरहाक्रान्तमनसो यदि नो सुखम् ॥ २९॥

तथापि तव सौभाग्यान्मुखे वाणीं युनज्म्यहम् ।
यत्ते प्रवर्त्तयिष्यामि प्रवर्त्त्यं न कदाचन ।
केभ्योऽपि प्राणतुल्येभ्यो भक्तेभ्योऽपि विशेषतः ॥ ३०॥

अस्याऽष्टादशशतीनामस्तोत्रस्य नारदऋषिरनुष्टुपछन्दः
श्रीकृष्णाऽभिन्ना राधारसमयीशक्तिर्देवता पुरुषस्य
पुरुषार्थचतुष्टय-
साधने श्रीराधानाम्नामष्टादशशतीपाठे विनियोगः ।

ॐ राधा परमा शक्तिः श्रीकृष्णप्राणवल्लभा ।
नित्या रसमयी शुद्धा प्रबुद्धा बुद्धरूपिणी ॥ ३१॥

कमला कमलास्या च कमलासनवन्दिता ।
कमलासना कामिनी च कान्ता कान्तमनोहरा ॥ ३२॥

कान्तिमत्यनुरागाढ्या कामकेलिविलासिनी ।
वृन्दारण्येश्वरी वृन्दा वृन्दारकमनोरमा ॥ ३३॥

विश्वेषां जननी विश्वा विश्वपालनकारिणी ।
विश्वाधारा विश्वरूपा विश्वसृष्टिविकासिनी ॥ ३४॥

विश्वेश्वरी विश्वमाया विश्वसंहारचारिणी ।
अमृता मोक्षदा मोक्षा मोक्षलक्ष्मीः सुलक्षणा ॥ ३५॥

नित्यं विलासरसिका नित्यं कौतुकलम्पटा ।
गोपी राज्ञी शशिमुखी खञ्जनाक्षी च खञ्जना ॥ ३६॥

क्रीडानिकुञ्जनिलया कदम्बतरुवासिनी ।
अभक्तोत्सारणकरी सदा प्रणतवत्सला ३७॥

जगन्मोहा मोहरूपा गजेन्द्रमृदुगामिनी ।
नितम्बिनी कामदेवजयजङ्गमदेवता ॥ ३८॥

शिवदा विपदुद्धारकारिणी विजयप्रदा ।
विजया भामिनी देवी श्रीमती रतिलालसा ॥ ३९॥

मदोन्मत्ता मादिनी च दीप्ता त्रैलोक्यसुन्दरी ।
वृषभानुसुता दुर्गा दुर्गोत्तारणकारिणी ॥ ४०॥

श्रीवृन्दावनचन्द्राक्षिचकोरवरचन्द्रिका ।
लावण्यवश्या स्नाताङ्गी पूर्णामृतरसोदया ॥ ४१॥

अनन्तानन्तचरिताऽनन्तविक्रमचातुरी ।
अरूपा अधिकाकारा अमिता अहिता हिता ॥ ४२॥

अलीकहीना अध्यास्या अरिष्टगणभञ्जनी ।
अरिक्ता अघृताशक्ता अत्युज्ज्वलसमुज्ज्वला ॥ ४३॥

अत्यद्भुता अविकृतिरविचारविवर्जिता ।
अवचोगोचरा व्यक्तिरमनो वर्त्मगामिनी ॥ ४४॥

अनुच्छ्वसन्मानसा च अतिकान्तिकलापिनी ।
अजन्मा कर्मसुकृता अमला अतिसुन्दरी ॥ ४५॥

अभिरामाऽभिचलिताप्यभिसारविहारिणी ।
अतीवरतिसञ्चारिमानसा चातिकामुकी ॥ ४६॥

अनङ्गरङ्गचतुरा चाङ्गसङ्गतचन्दना ।
अपाङ्गभङ्गसञ्चारा अतिथिप्रियसेविनी ॥ ४७॥

अमराधिताङ्घ्रिब्जा अलिका कलिकाकुला ।
अचिन्त्यरूपचरिता अधिकानन्दशालिनी ॥ ४८॥

अमन्दरससम्पन्ना अकला चाकुला तथा ।
अकाला चाकृतिरताऽप्यचला चलसन्निभा ॥ ४९॥

अमन्दा अरुणाक्षी च अरुणारुणिमाधरा ।
अपराधभञ्जिनी च अखला चाबला तथा ॥ ५०॥

अगलन्ती छलाढ्या च अम्बुदागमहर्षिता ।
अम्बरावीतसर्वाङ्गी अम्बुराशिनिवासिनी ॥ ५१॥

अतलाघातिनी चापि अनिलानलरूपिणी ।
अफलाढ्याप्यभीता च अमूलाप्ययमादरा ॥ ५२॥

अरविन्देक्षणाऽलास्याऽप्यबोधा चाहृदर्पिता ।
अक्षमालाधरा चाक्षकुन्तकाप्यक्षणेक्षणा ॥ ५३॥

अकामाऽकालमिलिता अकान्ताऽगामिनी तथा ।
अचारिका जालगता अतानाऽतान्तरूपिणी ॥ ५४॥

अदान्ताऽघारिणी चैव अलास्याऽपालिता तथा ।
अवारिताप्यभाव्या च अमाल्या मार्द्दवाऽपरा ॥ ५५॥

आकल्पाकलिता कल्या चाक्कणन्मणिनूपुरा ।
आकम्रा कमिता कम्रा चाकुञ्चितशिरोरुहा ॥ ५६॥

आखेलमाना खेला च आखेटकविहारिणी ।
आलस्येन विहीना च आलया लास्यकारिणी ॥ ५७॥

आगमोक्ताद्ऽप्यगणिता आगमे गोपिता गता ।
आघृणा चञ्चलाऽभ्यर्च्या आज्वलज्वलनोज्वला ॥५८॥

आतन्वती रतिकथामादरोदारभाविता ।
आनतानतिसुप्रीता चापन्नैरापदि स्मृता ॥ ५९॥

आफलितावृता वीता भासयन्त्यभया तथा ।

आमूलरससंस्निग्धहृदयाऽऽमयवर्जिता ॥ ६०॥

आयता रतिशीला च आलीढा हसितानना ।
आबुद्धाप्याश्रिताऽखिन्ना हाररूपा च जीविनाम् ॥ ६१॥

आक्षोदा क्षीणमध्या च आक्षालनकरी तथा ।
इन्दीवरवरामोदा इन्दुकोटिसुशीतला ॥ ६२॥

इच्छामयीष्टा शिष्टानामिन्दीवरवनप्रिया ।
इनसेवनसन्तुष्टा इकास्येभा मदागमा ॥ ६३॥

ईश्वरी ईशवशगा चेक्षणाह्लादकारिणी ।
ईहमाना ईतिहीना ईडिता सर्वदैवतैः ॥ ६४॥

उमा उचितकर्त्री च उक्तिप्रत्युक्तिकारिणी ।
उन्मदाऽप्युषितोल्लासा चोच्चैस्तेजोभिरुज्ज्वला ॥ ६५॥

उग्रा चोग्रप्रभा उल्काप्युक्षवाहनसेविता ।
उच्चस्वराऽप्युदीर्णा च उन्नीतोन्वयशालिनी ॥ ६६॥

उच्चार्यमाणचरिता चोद्धतोद्धारकारिणी ।
उपपन्नाऽप्युन्मनाश्च उपपातकपातिनी ॥ ६७॥

उदाराऽप्युन्नसोपायाऽप्यूरीकृतजगत्त्रया ।
उल्ललन्ती तथोल्लोलाऽप्युच्छ्रितोच्छ्रायकारिणी ॥६८॥

उछ्वासाऽप्युच्छ्वसद्वक्त्रा उच्छ्वासनविवर्जिता ।
उषा उषःकालगता उषसिप्रतिचिन्तिता ॥ ६९॥

उत्साहवर्धनकरी उत्सहन्ती परां व्यथाम् ।
उत्सेधोत्सेककलिता उत्सारितविदूषणा ॥ ७०॥

ऊर्ध्वोर्ध्वगमनी ऋक्षा ऋक्षवृन्दनिषेविता ।
ऋक्षव्यूहाभयङ्कारी ऋभुक्षा ऋक्षरूपिणी ॥ ७१॥

एकाकिनी त्वेधमाना एणाक्षी एकसेविता ।
ऐङ्काररूपिणी ऐक्यशालिनी ऐच्छिकी तथा ॥ ७२॥

ऐश्वर्येण विनाच्यार्या च ऐन्द्रिया चैन्द्रदायिनी ।
ओकःस्वरूपिणी ओघा ओघतारणकारिणी ॥ ७३॥

ओजस्विनी औचिती च औदरिक्यौर्द्धिकी तथा ।
कालिका कलिका कीला कीलालाकुलनिग्रहा ॥ ७४॥

कुलीना कुलधर्माढ्या कुचकुट्टलकुट्टिता ।
कृता कृतमयी कृत्या हीनाकृतिनिषेविता ॥ ७५॥

केलिलोला केलिरूपा कौलिकी कौलरूपिणी ।
कौलाचारपरा कौलैःसेविता कौलधर्मिभिः ॥ ७६॥

काञ्चनाङ्गी कण्टकिनी कण्टकेन विवर्जिता ।
कुत्साविहीना कन्दर्पदर्पसंहारकारिणी ॥ ७७॥

कलिन्दकन्या कूलस्था कालिन्दी कलनिःस्वना ।
काकी कङ्कतिका कङ्करूपिणी चैव किङ्करी ॥ ७८॥

काचा काचमयी चैव कच्छपी कज्जलोज्ज्वला ।
कटकर्त्री कटिपटी कटन्दीनिरता कटा ॥ ७९॥

कठोरा कठिनव्यक्ता कठिना कठिनस्तनी ।
कडारा काण्डसम्पूर्णा कण्डूः कण्डूतिकारिणी ॥ ८०॥

कुण्डा कुण्डलिनी कुण्डरूपिणी कुण्डसंस्थिता ।
कुण्डिना कुण्डिनस्था च कण्डोलस्थितिकारिणी ॥ ८१॥

कातरा क्वथिता क्वाथा कनकाचलवासिनी ।
काननी काननमयी काननेन स्तुता कदा ॥ ८२॥

काधारा कृपणा कूपा कूपशोषणकारिणी ।
कफप्रहारिणी चैव कैवल्यमोक्षदायिनी ॥ ८३ ।१
कामाकुला कूलहीना कर्मकार्मणकारिणी ।
कामदीप्ता काररूपा कलाढ्या काशिकामयी ॥ ८४॥

काशीश्वरप्रकाशा च कौशिकी कोशरूपिणी ।
कशा कशाताडिनी च केशिनी केशिसूदनी ॥ ८५॥

काष्ठा काष्ठिनी कुष्ठनाशिनी कुशजनकरी ।
कुशेशया कृशाङ्गी च कीशकेश्वरसेविता ॥ ८६॥

कुशला कुशलाढ्या च कुशला कलिका तथा ।
काषायवसना काष्ठा काष्ठिनी कुष्ठनाशिनी ॥८७॥

कूर्मजलकरी कंसध्वसिनी कसृतिक्षमा ।
काहारकारिणी कक्षा कक्षाकोटिविहारिणी ॥ ८८॥

कक्षरूपा कक्षमयी कौक्षेयककरी तथा ।
कुक्षिसंस्थापिता चैव कुक्षतिः कुक्षमाकरी ॥ ८९॥

चक्रपाणिश्च चकिता चक्राढ्या चक्रवर्तिनी ।
चामीकराकारगौरी चमूरुरमणीक्षणा ॥ ९०॥

चञ्चला चिञ्चिनाथेष्टा चञ्चदङ्गी च चिञ्चिका ।
चटका चटकप्रीता चण्डिका चण्डविक्रमा ॥ ९१॥

चित्तेशा चातकी चन्द्रा चन्द्रिका चन्द्ररूपिणी ।
चीनाचारपरा चैव चीनदेशभवा तथा ॥ ९२॥

चपला चम्पकामोदा चम्पकाङ्गी तथैव च ।
चयरूपा चयाकारा चारुरूपा चराचरा ॥ ९३॥

चरित्रचारिणी चर्व्यमानासुरनराधिपा ।
चतुश्चरिधरा चीरा चिरचारणचारिता ॥ ९४॥

चलाचलप्रिया चैव चलद्विन्दिमनोहरा ।
चाषरूपा चूष्यरसा चषकास्यतपायिनी ॥ ९५॥

चक्षुर्लक्षणयुक्ता च चरमाऽचरमाऽचला ।
टीका टङ्कारिणी चैव टलण्टलकरी तथा ॥ ९६॥

तिक्ता चैव तथा तङ्का तङ्किनी तङ्कवर्जिता ।
तिग्मा तकारसन्तुष्टा तिग्मवह्निप्रिया तथा ।१ ९७॥

तङ्कनी तङ्कमहिमा तच्छ्रीस्ताच्छील्यशालिनी ।
तुच्छहीना तेजिता च तज्जिता तज्जयात्मिका ॥ ९८॥

तटिनी तटरूपा च तडित्ताडनकारिणी ।
तडागनिलया ताड्या तडित्वत्प्रीतिदायिनी ॥ ९९॥

ताण्डवा ताण्डवप्रीता तण्डा ताण्डवितानना ।

तूणीरा तूणकुशला तुण्डिनी तुण्डभूषणा ॥ १००॥

ततातातिकरी तानप्रिया तित्तिरिनिःस्वना ।
तोत्रा तोत्रकरा चैव तत्सत्तत्सन्निवेशिता ॥ १०१॥

ततिनी तडिनी चैव तथास्त्वितिवरप्रदा ।
तथागतागताभिज्ञा तथ्यवाणी तथैव च ॥ १०२॥

तथ्यातथ्यवता चैव तिथिस्तिथिपतिप्रिया ।
तदाराध्यतनुस्तन्वी तनुरूपा तनीयसी ॥ १०३॥

तानिनी तानरसिका तपस्या तपसारता ।
तपस्विनी तापहीना तापिनी तापसप्रिया' ॥ १०४॥

तृप्ता तेमनसुप्रीता तेमना ताम्यतीतमा ।
तापिनी तारिणी तारा त्रिनेत्रा त्रिशरीरिणी ॥ १०५॥

त्रयी त्राणकरी त्रेता त्रेतायुगसमुत्थिता ।
तरिस्तरणिसन्तुष्टा तरुणी तरुरूपिणी ॥ १०६॥

तरुणानन्दिनी तीररसिका तीरसंस्थिता ।
तला तल्लयमापन्ना तानोत्सवपरायणा ॥ १०७॥

तालाङ्करसिका तालप्रिया तिलकिनी तिला ।
तिलोत्तमा तुलाहीना तुलिता तृणकारिणी ॥ १०८॥

तुषिनी तुषहीना च तुष्टिस्तुष्टमनास्तथा ।
तृष्णा तृष्णावर्जिता च तोषिणी तोषकारिणी ॥ १०९॥

तक्षिणी तक्षरूपा च तक्षकादिनिषेविता ।
तीक्ष्णा तीक्ष्णप्रभा पाका पाकसम्पादिनी तथा ॥ ११०॥

पिकस्वरा पक्षिरता पक्षिराजनिषेविता ।
पक्षव्रतपरा चैव पक्षिणी पक्षरूपिणी ॥ १११॥

पूग पूगरता पङ्का पङ्काकुलसुदुर्लभा ।
पचिनी पाचिनी पृच्छा पृच्छाकुशलकारिणी ॥ ११२॥

पूज्या पूजनशक्ता च पञ्चाननिषेविता ।
पञ्चवक्त्रा पञ्चबाणमोहिनी पञ्चसेविता ॥ ११३॥

पञ्चत्वहा पञ्चपापनाशिनी च तथैव च ।
पञ्चमस्वरसन्तुष्टा पञ्चास्यक्षीणमध्यमा ॥ ११४॥

पाञ्चालिका पाञ्चजन्यनिनदा पिञ्जशालिनी ।
पञ्जरा पञ्जरस्था च पुञ्जिनी पुञ्जरूपिणी ॥ ११५॥

पटीसिन्दूरतिलका पटशाटीसमावृता ।
पाटला पुटिनी चैव पेटीपोटा तथैव च ॥ ११६॥

पठनासक्तहृदया पाठिनी पीडितासुरा ।
पणकर्त्री पाणिपद्मशोभिता पण्डिता तथा ॥ ११७ ॥
पाण्डित्यदायिनी चैव पिण्डदा पिण्डतोषिता ।
पतितोद्धारकर्त्री च पातिताऽमित्रसंहतिः ॥ ११८ ॥
पितृभक्तिरता चैव पुत्रिणी पुत्रदायिनी ।
पूतना पूतनाशत्रुः पृतना पृतनावती ॥ ११९॥

पोताधानाधानकर्त्री पोतनिस्तारकारिणी ।
पथिपूज्या पथिप्रज्ञा पथिकोच्छ्वासकारिणी ॥ १२०॥

पाथोरुहनिवासा च पृथिवी पृथिवीश्वरी ।
पदा पादपतद्भक्ता पिदधाना पिधायिनी ॥ १२१॥

पानीयजसमुच्चेताः पीनस्तनकटिद्वया ।
पुनःपुनारसावेशा पौनःपुन्यविधायिनी ॥ १२२॥

पन्थाः पान्थस्वरूपा च पान्थदुःखविनाशिनी ।
पापनाशी पुष्परता पवनोत्सुकमानसा ॥ १२३॥

पावकोज्ज्वलतेजाश्च पिबपिबेतिवादिनी ।
पीवरा पामरा प्राप्या पम्पापदविलासिनी ॥ १२४॥

पयस्विनी पयोजाढ्या पायसप्रीतमानसा ।
प्रियालकुसुमासक्ता परोन्मूलनकारिणी ॥ १२५॥

पारप्रदा पुराणार्च्या पूर्वोत्था पूर्वसेविता ।
पौर्वापर्यकरी चैव पलायनविवर्जिता ॥ १२६॥

पालनी पुलकाङ्गी च पाशहस्ता तथैव च ।
पृश्निगर्भावतारा च पिण्डघोरसुदुर्धरा ॥ १२७॥

पुष्टदेहा पुष्टरूपा पोष्यपोषणकारिणी ।
पौषमासनिदाघा च पाक्षिकी पक्षिनिःस्वना ॥ १२८॥

पक्षद्वयविधात्री च पक्षान्तार्हणतोषिता ।
खकृता खगतिश्चैव खगतिर्लघुपायिनी ॥ १२९॥

खगे खगी खगरुती खगनागस्वरूपिणी ।
खञ्जा खञ्जप्रिया चैव खञ्जनाक्षी च खञ्जनी ॥ १३०॥

खट्वारता च खट्वाङ्गधारिणी खेटकप्रिया ।
खण्डा खाण्डवदाहा च खण्डिता सुरयूथपा ॥ १३१॥

खादन्ती खाद्यमाना च खण्डहीना च खेदनी ।
खनित्री खननासक्ता खनिरूपा खनीलिभा ॥ १३२॥

खिन्ना खरतरा चैव खरांशुमालिनी तथा ।
खलखली खारकरी खलीनकुरुकाश्रया ॥ १३३॥

खलीना खिलहीना च खिलाखिलनिषेविता ।
गौर्गोभिःकमिता चैव गोखुरार्चनसंरता ॥ १३४॥

गगना गगनाधारा गोगता गोगणार्चिता ।
गोग्रहा गोग्रहाह्लादकारिणी च तथैव च ॥ १३५॥

गोधनाह्लादसन्तुष्टा गोघटा घटिता तथा ।
गङ्गा च गाङ्गता चैव गञ्जनी गञ्जनोज्झिता ॥ १३६॥

गुञ्जन्मधुव्रतरुता गुञ्जामालाविभूषणा ।
गणेश्वरी गणरता गणेश्वरनिषेविता ॥ १३७॥

गुणिता गुणपूर्णा च गौणा गुणविवर्जिता ।
गण्डा गण्डवती चैव गण्डकुण्डलमण्डिता ॥ १३८॥

गण्डकी चैव गाण्डीवधारिणी गेन्दुकप्रिया ।
गता गतिमती चैव गीता गीताप्रचारिता ॥ १३९॥

गोतनुर्गोतता गाथा गाथागानपरायणा ।

गदिता गदसंहन्त्री गोदानव्रतचारिणी ॥ १४०॥

गोधा गोधाङ्गुलित्रा च गोधान्यधनवर्द्धिनी ।
गानासक्तमना गन्त्री गन्धा गन्धवहा तथा ॥ १४१॥

गोपी गोपालसक्ता च गोपालबालपालिता ।
गोपगोपार्चिता चैव गोपतिप्रणयान्विता ॥ १४२॥

गोफला गोफलकरी गोवर्धनघरी तथा ।
गोबला गोबलीवर्दनर्दनोत्सवमानसा ॥ १४३॥

गोबालकलिताभूषा गोविन्दप्रेमलालसा ।
गोवाहनमनोज्ञा च गोवृता गोवनस्थिता ॥ १४४॥

गोभारभरणासक्ता गोभूता गोऽमृतप्रिया ।
गमिता गमने मन्दा गामिनी गोमती तथा ॥ १४५॥

गम्भीरी चैव गम्भीरा गयासुरनिषूदनी ।
गया गयावासिनी च गायत्री चैव गायनी ॥ १४६॥

गेया गोयानरसिका गरला गरलाकुला ।
गानोन्मत्तमणिश्रीका गिरन्ती च गिरामयी ॥ १४७॥

गीर्यमाणा गोरसाढ्या गोरसक्रयकारिणी ।
गौरी गोश्वसितामोदा गृष्टिरूपा तथैव च ॥ १४८॥

गोसारणकरी चैव गोसुलक्षणलक्षिता ।
गोसर्जनकरी चैव गहना गहनप्रिया ॥ १४९॥

गाहा गुहनिषेव्या च गुह्या च गृहदेवता ।
गेहिनी गोक्षमाधीरा घूका घूकारुतोत्सवा ॥ १५०॥

घाटिता घटिता चैव घाटावत्यपि घाटिका ।
घोटकाकारकलिता घण्टा घण्टाविमोदिनी ॥ १५१॥

घण्टाकर्णनिषेव्या च घाणामौक्तिकराजिता ।
घृणावती घातकरी घृतामोदविधायिनी ॥ १५२॥

घनानन्दा घनमयी घनाघननिषेविता ।
घनागमरकृतरतिर्धर्मागमसुशीतला ॥ १५३॥

घर्षणा घृष्टरूपा च घृष्टिर्घासाभिलाषिणी ।
छेकाछेक रवेलमाना छगली छागवाहिनी ॥ १५४॥

छागवाहनसेव्या च छटात्रैलोक्यमोहिनी ।
छत्राछत्रमयी छत्रछादिता छात्ररूपिणी ॥ १५५॥

छदाकर्णा छादिनी च छेदिनी छेदवर्जिता ।
छदरूपा छन्नरूपा छन्ननाम्नी तथैव च ॥ १५६॥

छिन्नमस्ता छन्नमूर्तिश्छन्नप्रच्छन्नकारिणी ।
छन्दा छन्दमयी चैव छन्दोगा छन्दसाम्प्रभुः ॥ १५७॥

छायामयी छायिनी च छायाकर्त्री छलप्रिया ।
छलाछलकरी छल्या जगन्नाथप्रियापि च ॥ १५८॥

जगतामुपकर्त्री च तथा जागरणक्षमा ।
जङ्गमा जङ्गमेशानी तथा जङ्गमचारिणी ॥ १५९॥

जटाजूटधारिणी च जडाजडनिपातिनी ।
जितामित्रा च जेत्री च जैत्रकर्मविधायिनी ॥ १६०॥

जननी जननीतिज्ञा जिनाचारपरायणा ।
जपा जप्या जपकरी जापिनी जीवधारिणी ॥ १६१॥

जीवापि जीवजीवातुर्जैवात्रिकमनोरमा ।
जडिनी जडसुप्रीता जमलार्जुनभञ्जिनी ॥ १६२॥

जेमना जेमनकरी जैमिनिस्तवनप्रिया ।
जम्बूलमालिकारक्ता जम्बूप्रीता च जाम्बवी ॥ १६३॥

जाम्बवत्यपि जम्बाला जम्बालकलिताऽपि च ।
जम्बुवत्सेविता चैव जम्बूनदविभूषणा ॥ १६४॥

जम्बीरविपिनासक्ता जम्बुकाननवासिनी ।
जृम्भापि जृम्भमानास्या जम्भसूदनवन्दिता ॥ १६५॥

जम्भप्रवैरिणी चैव जया च जयिनी तथा ।
जाया जेयविजेत्री च जरामरणवर्जिता ॥ १६६॥

जला जलमयी चैव जलेश्वरनिषेविता ।
जलवासा जालहीना जालक्षेपणकारिणी ॥ १६७॥

जक्षिणी जक्षसेव्या च जक्षिणीगणसेविता ।
जक्षराडभिलाष्या च झङ्कारा झङ्कृतिप्रिया ॥ १६८॥

झञ्झारूपा झटा चैव झिण्टीकुसुमपूजिता ।
झररूपा झषाकारा झषराशिनिषेविता ॥ १६९॥

ठं ठं ठनितिशब्दाढ्या ठद्वया ठठरूपिणी ।
डमड्डमरुहस्ता च ढक्कावाद्यविनोदिनी ॥ १७०॥

दण्डा दण्डधरा चैव दण्डपाणिनिषेविता ।
दात्री दूती दूत्यसक्ता दूतिसञ्चारकारिणी ॥ १७१॥

दानसञ्चारसन्तुष्टा दानद्विरदगामिनी ।
दण्डिनी दण्डधवला दान्ता द्वन्द्वविनाशिनी ॥ १७२॥

दन्दशूकसमाकारा दवाग्निवीर्यसम्भृता ।
दावम्थिता दविष्ठा च देवतागणसेविता ॥ १७३॥

देवी देववसुस्निग्धा देवकी देवकप्रिया ।
तथा दैवविधानज्ञा दैवविद्भिर्निषेविता १। १७४॥

दमरूपा दामिनी च दम्भा दम्भोलिविक्रमा ।
दम्भा दम्भवती चैव दया चापि दयामयी ॥ १७५॥

दायाढ्या दायरूपा च दूयमाना सुराधिपा ।
देयप्राप्या दराढ्या च दरहीना दरावहा ॥ १७६॥

दारिणी दूरलभ्या च दलपूर्णा दलप्रिया ।
दोलायमानसर्वाङ्गी दिव्यतेजःप्रकाशिनी ॥ १७७ १।
दिव्या दिविविहारा च दिवारात्रिकरी तथा ।
दशादिग्ज्योतिनी चैव दशाफलविधायिनी ॥ १७८॥

दशादशकलादेशकालोचितपराक्रमा ।
दिशन्ती दाशरूपा च दोषलेशविवर्जिता ॥ १७९॥

दोषक्षयकरी दुष्टदूषणोद्धारकारिणी ।

दासीप्रिया दास्यकरी दासीगणविराजिता ॥ १८००
दहना दहनेशा च दाहनिर्मूलकारिणी ।
दहनी दीहमाना च दिहन्नितम्बशालिनी ॥ १८१॥

देहधात्री दौहिकी च दोहिनी दोहरूपिणी ।
दक्षा दक्षिणदिग्जाता दक्षिणा दक्षिणप्रिया ॥ १८२॥

दाक्षिण्यनिरता दीक्षा दीक्षाकृतिपरायणा ।
दीक्षितप्रणयाविष्टा दीक्षितातिवशस्थिता ॥ १८३॥

धिक्कारिणी च धटिनी धेटीकटिसुशोभिता ।
धेटिनी धेटरूपा च धृतश्रीर्धौतविग्रहा ॥ १८४॥

धन्या धनदसन्तुष्टा धन्वानोदनकारिणी ।
धूपिनी धूपसम्मोदा धवलाङ्गी च धाविनी ॥ १८५ १।
धमिनी धामिनी धूम्रा धूमकेतुविनाशिनी ।
धूमयोनिकतप्रीतिर्धूम्रलोचनमर्दिनी ॥ १८६॥

धूमा धौम्या धौम्यरता ध्मायमानाऽम्बुजापि च ।
धिया प्राप्या धूयमाना ध्येया ध्यानविगोचरा ॥ १८७॥

धरणी धरणीशानी धरणीधरधारिणी ।
धाराधारमयी धाराधारिणी धीरपूजिता ॥ १८८॥

धुरन्धरा धोरणी च धौरीणव्रतचारिणी ।
धूलिधूसरगात्रा च धूसरा धूसरेक्षणा ॥ १८९॥

धिषणावत्सेविता च धिषणा धिषणावती ।
धूक्षन्ती नाकनिलया नाकनायकनायिका ॥ १९०॥

निकटस्था च नौका च नौकासन्तारकारिणी ।
नृकपालमालकण्ठा निकारान्तविधायिनी ॥ १९१॥

नखरा नखचन्द्रा च नसरेखाविभूषणा ।
नगगानगजा चैव नगराजनिवासिनी ॥ १९२॥

नागवाहनसन्तुष्टा नागिनी नागसेविता ।
नवला नाचला चैव नृचातुर्यकरी तथा ॥ १९३॥

निचोलाञ्चलसंवीता नैचिकीगणपूजिता ।
नौचला नोच्छलकरी नृच्छादनकरी तथा ॥ १९४॥

निजलोकशोकहरा नेजनी नौजनस्तुता ।
नृजनार्चनसन्तुष्टा नृसंहारकरी तथा ॥ १९५॥

नटिनी नटरूपा च नटनाटनकारिणी ।
नाट्यलीलाविनोदा च नाटिताखिलसंमृतिः ॥ १९६॥

नीजजारुतकर्त्री च नीजजाधिपवाहना ।
नतचेतोऽम्बुजस्था च निन्दानन्दमयी तथा ॥ १९७॥

नूतनातिनूतना च नेत्रत्रयविभूषिता ।
नेत्री नेत्रशोभिताङ्गी नास्वरूपा नदन्मुग्वी ॥ १९८॥

नादरूपा निदधती नौधराधरनिश्चला ।
नदस्वरा चैव तथा नानागुणसमन्विता ॥ १९९॥

नृणामप्रीतिहृदया नौनाशितभयावहा ।
नन्दिनी नन्दिता चैव नन्दनन्दनजीवनी ॥ २००॥

निन्दाहीना तथा नन्दा नीपमूलविनाशिनी ।
नृपतित्वप्रदा चैव नौपतिप्रतिसेविता ॥ २०१॥

नृफलैकप्रदात्री च नवनीतसुकोमला ।
नावनीतरसस्निग्धा निविडाश्लेषकारिणी ॥ २०२॥

नीविबन्धानुबन्धा च नभोगमनलालसा ।
नाभिहृदगभीरा च निभासद्भास्करोज्ज्वला ॥ २०३॥

अपि नौभवनस्था च नमस्या नाममोहिनी ।
निम्ननाभिसुशोभा च नृमण्डलविभूषणा ॥ २०४॥

नेमिर्नैमिवती चैव नैमिषारण्यवासिनी ।
नित्यरूपा नित्यरसा नयनानन्दवर्धिनी ॥ २०५॥

नयधीरा नायिका च नियता नियतिप्रदा ।
नियमाचारसञ्चारा नरेन्द्रपरिसेविता ॥ २०६॥

नरान्तर्यामिनी चैव निरयान्तककारिणी ।

नारायणी नीरवासा नैरन्तर्या च नौरता ॥ २०७॥

नलसेव्या च नानाढ्या तथा नीलसरस्वती ।
नृलम्बनकरी चैव नौलम्बनकरी तथा ॥ २०८॥

नाशनी नाशरहिता नृशीलपरिशीलना ।
नौशान्धकारदलनी नोषरस्था च नोषिता ॥ २०९॥

नासावेषितमुक्ता च नृसज्जनसुतोषिता ।
नीहारालयपुत्री च निहतिर्निहतिक्रिया ॥ २१०॥

नीहारांशुसमाकारा तथा नौहरणोद्यता ।
नृक्षयकरी तथा चैव नौक्षालनकरी तथा ॥ २११॥

फटावती फणिपतिप्रथिता फणदीपिता ।
फेनशुभ्रा च फूत्कारा फेत्कारिण्यपि फेरुता ॥ २१२॥

फलदात्री फुल्लरूपा फुल्लस्तबकशोभिता ।
फल्गुरूपा फल्गुवाक्या फल्गूत्सवपरायणा ॥ २१३॥

बकलीला बाकला च वृकव्यूहविनाशिनी ।
वृकोदराऽग्निरूपा च बाता वाग्वागुपासिता ॥ २१४॥

विगता वेगिनी चैव विधातृभयनाशिनी ।
वचनारचनादक्षा वाचिकप्राणमोहिनी ॥ २१५॥

विचारचतुरा वीचिर्वीचिहन्त्री तयैव च ।
वज्रभूषा वज्रपाणिर्वज्रवैरोचनी तथा ॥ २१६॥

वाजिपृष्ठसमारूढा विजरा बीजरूपिणी ।
वञ्चकारुतसन्धात्री वञ्चकव्यूहवेष्टिता ॥ २१७॥

वटमूलनिवासा च वटाधिष्ठानकारिणी ।
विटजल्पितसुप्रीता विट्ठलेश्वरपूजिता ॥ २१८॥

विड्डूजिता च वडवा वाडवाग्निसमप्रभा ।
वीणावादनसुप्रीता वीणा वीणावती तथा ॥ २१९॥

वन्दनासक्तहृदया वसन्तोत्सवकातरा ।
वातपुत्री च वितनुध्वजिनी वीतविद्रवा ॥ २२०॥

वृतकन्दर्पमित्रा च वेत्रपाणिस्तथैव च ।
वदावदप्रिया चैव वादिनी विदरा तथा ॥ २२१॥

वेदरूपा वेदवती वैदर्भीवधकारिणी ।
बाधा बाधानाशिनी च विधन्वा विधुरूपिणी ॥ २२२॥

विधिशीला बुधा बोध्या वेधःपूज्या च वैधसी ।
बोधिता बोधशीला च बौद्धा बौद्धक्रियाप्रिया ॥ २२३॥

वनस्थिता वानप्रस्था विनेत्रा वृन्तरूपिणी ।
वन्दनप्रीतचित्ता च वन्दिता वन्दितप्रिया ॥ २२४॥

वृन्दारवृन्दवीता च वृन्दावनविलासिनी ।
बन्धनापन्नाशिनी च बन्धुजीवारुणाधरा ॥ २२५॥

वन्ध्यापत्यप्रदा चैव बान्धवाप्रीतमानसा ।
वपनोत्सवसंसर्पा वनिता विपणिस्थिता ॥ २२६॥

वरवरस्त्रवद्रक्ता विवरान्तरचारिणी ।
विभीर्वैभवसम्पूर्णा वमितासुरपुङ्गवा ॥ २२७॥

वामा च वामदेवार्च्या विभनोहृदयस्थिता ।
बिम्बाधरा व्ययाढ्या च वैयासकिनिषेविता ॥ २२८॥

वरारोहा वारिणी च विरहानलकीलिता ।
वीरा वीर्ययुता चैव वीरणप्रीतिमानसा ॥ २२९॥

वैरिनिष्कम्पिनी चेव बलसूदनदुर्लभा ।
बलरामाभिरामा च बलविक्रमकारिणी ॥ २३०॥

बाला बिलप्रविष्टा च विलम्बकरणक्षमा ।
वशंवदा विशाखेशा वेशचारुविलासिनी ॥ २३१॥

वैशम्पायनपूज्या च वषड् विषविनाशिनी ।
वृषासुरनिहन्त्री च वृषरक्षणकारिणी ॥ २३२॥

वौषड्वसनशून्या च वास्तुयागसुतोषिता ।
विसिनीदलवासा च वाहिनी वाहिनीस्थिरा ॥ २३३॥

विहारकारिणी चैव बृहती वैहायसी तथा ।
वक्षोरुहयुगोत्तुङ्गा विक्षालनकरी तथा ॥ २३४ ०।
वृक्षश्रेष्ठाग्रनिलया भेकप्लुतिविनाशिनी ।
भगभालालङ्कृता च भगवत्यपि भागिनी ॥ २३५॥

भाग्यवत्ती तथा चैव भृगुसेवनतोषिता ।
भोगिनी भोगदा भोग्या भङ्गभीतिविनाशिनी ॥ २३६॥

भृङ्गरङ्गसङ्गमा च भजनस्निग्धमानसा ।
भाजनश्रीवृद्धिकरी भुजान्दोलविलासिनी ॥ २३७॥

भोज्यभोजनसन्तुष्टा भञ्जनी भटदुर्घटा ।
भुवनासक्तवदना भण्डमण्डनकारिणी ॥ २३८॥

भाण्डवत्यपि भाण्डाङ्गी भीता भूतरानिषेविता ।
भृता भृत्यप्रिया चैव भौतचेष्टाविधायिनी ॥ २३९॥

भिदाकर्त्री भेदहीना भूपगोष्ठीसमर्चिता ।
भापपदप्रदात्री च भवेन परिभाविता ॥ २४०॥

भाविनी भुवनप्रीता तथा भामा च पम्भामिनी ।
भीमवीर्यपोषणी च भूआंमभूंमगुणाबूता ॥ २४१॥

भौमस्थानप्रदात्री च भौमग्रहसुपूजिता ।
भयहीना भवोद्भ्रान्ता भारोत्तोलनकारिणी ॥ २४२॥

भीरुर्भूरिगुणोपेतसेविता भेरिनिःस्वना ।
भेरुण्डा भैरवी चापि भूलम्बनकरी तथा ॥ २४३॥

भृशदुरितनिहन्त्री च भाषिणी भिषगर्चिता ।
भीषणा च भुशुण्ड्यस्त्रा भूषणेन विभूषिता ॥ २४४॥

भेषजाशननीरोगा भैषज्यपददायिनी ।
भक्षिणी चैव भिक्षुश्च भिक्षाकर्मकलापिनी ॥ २४५॥

भूक्षयकलालोला च तथा भैक्ष्यविधायिनी ।
भैक्षाचारसुसन्तुष्टा मकराकृतिकुण्डला ॥ २४६॥

मुक्ता मुक्तनिषेव्या च मुक्ताहारविहारिणी ।

मृकण्डुतनयाच्र्या च मृकण्डपरिखण्डिनी ॥ २४७॥

मौक्तिकाभासुररदा मखकर्मसमर्हिता ।
मेखला कटिबन्धा च मौखर्यपरिवर्जिता ॥ २४८॥

मृगशिरसि जाता च मृगचर्मोपवेशिता ।
मृगपत्नीलोचनी च मुग्धा मुग्धनिषेविता ॥ २४९॥

मघवद्विक्रमकरी मोघीकृतरिपुव्रजा ।
मेघकेशी मङ्गली च तथा मङ्गलदायिनी ॥ २५०॥

मज्जावती मृजाशीला मञ्चस्था मञ्जुवागपि ।
मोटिनी मठमध्यस्था मृडानी मेढूचक्रगा ॥ २५१॥

मणिमण्डपमध्यस्था मणिराजिविराजिता ।
मणिपत्रस्थिता चैव तथा माणवकाकृतिः ॥ २५२॥

मृणालाभभुजायुग्मा मृणालशयनोत्सुका ।
मण्डलान्तरसंस्था च मुण्डमालासमाकुला ॥ २५३॥

मताभिज्ञा मातलीष्टा मित्रसंसर्गतोषिता ।
मृतसत्कारकर्त्री च मैत्रवर्त्मप्रकाशिनी ॥ २५४॥

मथनी मदपूर्णा च मादिनी मुदिता तथा ।
मृदिता मेदुरा चैव मोदिनी मौदिरप्रदा' ॥ २५५॥

मधुमाध्वीकमत्ता च माधवीपुष्पसौरभा ।
मृधनिर्जयिनी चैव मनोविषयजृम्भिता ॥ २५६॥

मानिनी मीननेत्रा च मुनिराजनिषेविता ।
मौनिनी च तथा चैव मन्थानदण्डधारिणी ॥ २५७॥

मन्दारकुसुमाच्र्या च मान्द्यवर्जनकारिणी ।
मयदानवसंसेव्या मायाहीना च मायिनी ॥ २५८॥

मयूरनिनदाप्रीता मयूररुतकारिणी ।
मरणत्रासहन्त्री च मारोद्दीपनकारिणी ॥ २५९॥

मुरागन्धप्रिया चैव मलक्लेशविनाशिनी ।
मालाशोभितसर्वाङ्गा मिलन्ती मीलयन्त्यपि ॥ २६०॥

मूलरूपा मौलिका च मेधामैश्वर्यदायिका ।
मिषन्ती मूषिकाकारा मूषिकांशुवरप्रदा ॥ २६१॥

मेषादिनी मोषहीना मासव्रतपरायणा ।
मोहिनी मक्षिकारूपा मेक्षणी मोक्षदायिनी ॥ २६२॥

यागप्रिया युगकरी योगिनीकोटिवल्लभा ।
यौगिकी याचमाना च यच्छन्ती यजनक्रिया ॥ २६३॥

याजयन्ती तथा चैव योजनायामविस्तृता ।
योटनी यतमाना च यातनाक्षयकारिणी ॥ २६४॥

यदुवंशक्षयकरी यानमङ्गलचारिणी ।
योनिरूपा यौवनाढ्या युवलोकविलोकिता ॥ २६५॥

यमभीतिक्षयकरी यामिनी यमुना तथा ।
यावद्गुणसुसम्पन्ना यशस्या च यशस्विनी ॥ २६६॥

यशोदामोहिनी चैव योषाकुलशिरोमणिः ।
रुक्मिणी रागरसिका रुगपेता च रोगहृत् ॥ २६७॥

राघवी राघवप्रीता रंङ्कानुग्रहकारिणी ।
रङ्गदा रिङ्गणकरी रोचिःसञ्चारकारिणी ॥ २६८॥

रुचिरा रौचिकी चैव राजलक्षणलक्षिता ।
रुजासञ्चारकर्त्री च रञ्जना रटनोत्सवा ॥ २६९॥

रणदुर्मदमत्ता च रतकालविलासिनी ।
रीतिज्ञा रुतघोरा च रथलक्षपुरोगता ॥ २७० १।
रदद्वयस्मेरयुता राधिता रोधकारिणी ।
रोधोविनाशिनी चैव रन्धनाकुलविग्रहा ॥ २७१॥

रूप्यभाण्डा रूपवती रोपणी रवकौतुका ।
राविणी रेवती रेवा तथा रैवतकस्थिता ॥ २७२॥

रमा च रमणी चेव रामणीयकमयुता ।
रोमराजीराजिता च रम्भा रम्भावनस्थिता ॥ २७३॥

रयकर्त्री रोषकरी रुष्टा रसितकौतुका ।
रासावेशविलासा च रोहिणी रक्षिणी तथा ॥ २७४॥

राक्षसेश्वरसेव्या च रूक्षा लकुचवेष्टिता ।
लगिता लग्नसञ्चारा चापि लग्नमयी तथा ॥ २७५॥

लघुबुद्धिप्रदा चैव लङ्कापुरनिवासिनी ।
लैङ्गवर्त्मप्रकाशा च लिङ्गरूपा च लिङ्गिनी ॥ २७६॥

लङ्घनी च तथा लज्जा लज्जाभरधरा तथा ।
लाजविक्षेपणी चैव लाङ्गुली लाङ्गुलान्विता ॥ २७७॥

लाता लोडनकर्त्री च लूतातन्तुप्रसारिणी ।
लूनामित्रा च लपनी लापसंलापकारिणी ॥ २७८॥

लोपामुद्रा लाभकत्री लोभहीना च लोभनी ।
लोमशाराध्यचरणा लम्बनी लम्भनी तथा ॥ २७९॥

लयहीना लयगता लयनान्तरशायिनी ।
लालामयी ललज्जिह्वा लास्यकर्त्री च लासिका ॥ २८०॥

लक्षसेव्या च लाक्षाभा लाक्षारागानुरागिणी ।
वुद्धिप्रदा बुद्धिरता बुद्धिरूपा तथैव च ।१ ९८१॥

शक्तिः शाकम्भरी चैव शिक्यनिर्माणकारिणी ।
शुकपोषणकर्त्री च शुकदेववरप्रदा ॥ २८२॥

शूकराकृतिकर्त्री च शूकधान्यसुतोषिता ।
शोकापनोदिनी चैव शाखिनी शिखिसत्प्रभा ॥ २८३॥

शाङ्करी शङ्करा चैव शङ्खिनी शृङ्गधारिणी ।
शाटीपटसमुद्दीप्ता शठलोकबिभर्त्सनी ॥ २८४॥

शाठ्यहीना तथा चैव शणसूत्रशिरोरुहा ।
शूलपाणिः शोणनेत्रा शातकुम्भस्तनद्वयी ॥ २८५॥

शितबाणा शीतमूर्तिः शोथघ्नी शुद्धरूपिणी ।
शान्ता शान्तिमती चैव शिञ्जिता सज्जनप्रिया ॥ २८६॥

शपथा शान्तहृदया शापमोचनकारिणी ।

शफरीनयनी चैव शिफारूढा शवासना ॥ २८७॥

शावपोष्ट्री शिवोपास्या शिवा च शेवधिस्तथा ।
शिविका शिविकारूढा शैववर्त्मप्रदायिनी ॥ २८८॥

शोभाकरी शमवती शामिन्यपि च शेमुषी ।
शम्पामध्या शम्बरारिवारिणी शाम्बरी तथा ॥ २८९॥

शम्भुरूपा शाम्भवी च शम्भुमूर्ध्निस्थितापि च ।
शयनोच्छ्वसिता चैव शायिता शरवारिणी ॥ २९०॥

श्रीः श्रीमन्निषेव्या च श्रीफलाधःस्थिता तथा ।
शारिणी शिवमूर्द्धा च शिवहस्ता तयैव च ॥ २९१ ।१
शूरसेव्या शैवहस्तप्रददा शौरकर्मिणी ।
शलभोद्धारिणी चैव शालानिर्माणकारिणी ॥ २९२॥

शिलावृष्टिकरी शीलशालिनी शूलिनी तथा ।
शैलतुल्या श्वरीना च श्वापदव्यूहवेष्टिता ॥ २९३॥

श्वेतासना श्वैत्यवती श्वाती श्वसनकारिणी ।
श्वासानिलसुगन्धा च शशचर्मनिवासिनी ॥ २९४॥

शैशवाढ्या शेषहीना शोषणी शासिनी तथा ।
शिक्षाकरी सुकण्ठी च सेककर्त्री सुकोमला ॥ २९५॥

सुखप्रदा सौख्यरूपा सगरान्वयतारिणी ।
सागरास्था च सुगदध्वंसिनी सङ्करप्रिया ॥ २९६॥

साङ्गोपाङ्गक्रियाध्यक्षा सङ्गसञ्चारकारिणी ।
सज्जनाह्लादजननी सुजनी सञ्चयार्चिता ॥ २९७॥

सितपद्मदलप्रीता सुतनुः सूत्ररूपिणी ।
सृता च सदरा चैव सादरा सीददुद्व्यथा ॥ २९८॥

सुदया सुदरा चैव सोदरप्रीतिकारिणी ।
सधवा च तथा साध्वी सिद्धा सीधुनिपायिनी ॥ २९९॥

सुधन्वा च तथा सेनाकोलाहलविधायिनी ।
सैन्यमूर्द्धासन्दलनी सन्देशहारिणी तथा ॥ ३००॥

सान्द्रानन्दा च सिन्दूरमण्डितालिकमण्डला ।
सुन्दोपसुन्दहन्त्री च सौन्दर्यसर्वमोहिनी ॥ ३०१॥

सन्धिविग्रहकार्या च सन्धात्री सन्ध्ययार्चिता ।
सन्ध्या सिन्धुस्वरूपा च सिन्धुमज्जनकारिणी ॥ ३०२॥

सैन्धवी सैन्धवश्रीका सुपदा सूपकारिणी ।
सौपद्यदायिनी चैव सवृत्तिः सावरा तथा ॥ ३०३॥

सुवर्णालङ्कारधात्री सौवर्णप्रभवोज्ज्वला ।
सभासभ्यधिकर्त्री च साभा च सुभगा तथा ॥ ३०४॥

समा साम्यविहीना च सीमन्तोत्सवकारिणी ।
सृमरा सोमभावा च सोमवर्त्मप्रसारिणी ॥ ३०५॥

सम्पन्ना च तथा सम्पत् सम्पद्दात्री तथैव च ।
संवृता च तथा सम्भाषणकौशलकारिणी ॥ ३०६॥

शुम्भनिशुम्भहन्त्री च सम्पन्ना सायतिस्तथा ।
सरःस्था सारसी चैव सुरसा सुरसाधिता ॥ ३०७॥

सौरस्यदायिनी चैव सनया सानया तथा ।
सुनीला स्वच्छबुद्धिश्च तथा स्वाच्छन्द्यकारिणी ॥ ३०८॥

रचनामृतवर्षिणी च स्विन्ना स्वप्नावती तथा ।
स्वयम्भूपूजिता चैव स्वयम्भूः स्वात्मदीपनी ॥ ३०९॥

स्वरसप्तकसङ्गीतरङ्गिणी स्वात्मभाविनी ।
स्वाहा स्वधा स्वाक्षरा च तथापि स्वामिवल्लभा ॥ ३१०॥

सक्षता साक्षिणी चैव सुक्षोदा सूक्षिता तथा ।
हुङ्कारिणी तथा हृद्वासिनी हठकारिणी ॥ ३११॥

हतिहन्त्री हुतप्रीता हुतासुरमहाहना ।
हृतपापा हेतिहस्ता होतृरूपा तथैव च ॥ ३१२॥

हौतासनप्रभाकर्त्री हृदम्बुजनिवासिनी ।
हननारिप्टहृदया हीनदोषा तथैव च ॥ ३१३॥

हम्भारवाकालनोत्था हृदयानन्दशालिनी ।

हयवाहनसुप्रीता हायनज्ञानदायिनी ॥ ३१४॥

हूयमाना हरिप्रीता हारिणी हीरकोज्ज्वला ।
हलिदर्शनक्रीम्भारा हलाहलनिपायिनी ॥ ३१५॥

हिलिहिलीतिकर्त्री च तथा हुलहुलिप्रिया ।
हेलाकरी ह्वालन्ती च ह्वालयन्ती तथैव च ॥ ३१६॥

हेषारवसमोदा सा हसन्ती हासविह्वला ।
हाहा हाहाकरी चैव हूहू गन्धर्ववेष्टिता ॥ ३१७॥

हैहयार्चिततजाश्च क्षतिकर्त्री क्षितिस्थिता ।
क्षुतकर्त्री क्षेत्ररूपा क्षेत्रपालनिषविता ॥ ३१८॥

क्षौतदोषप्रशमनी क्षुद्रा च क्षोदिना तथा ।
क्षौद्रकप्रीतहृदया क्षिपन्ती क्षोभवर्जिता ॥ ३१९॥

क्षमावती तथा क्षामाक्षरोल्लापविलासिनी ।
क्षेमङ्करी क्षौमवस्त्रा तथा क्षयविवर्जिता ॥ ३के ०॥

क्षरहीना भक्तजना क्षारहीना तथैव च ।
क्षारप्रीताक्षरप्राप्या क्षालनी क्षालनप्रिया ॥ ३२१॥

अघमर्दन्यङ्कजा च अङ्गप्रत्यङ्गकोमला ।
अच्छीकरणदक्षा च अजमाया तथैव च ॥ ३२२॥

अञ्चलीचञ्चला चैव अञ्जनारञ्जनी तथा ।
अटवीरटनप्रीता अतलाधःस्थिता तथा ॥ ३२३॥

अवनी अमरारातिकोटिकोटिनिपातिनी ।
अयस्थिता अरालभ्रुरशक्ताऽशकला तथा ॥ ३२४॥

अशया अशरा चैव अशलाकाशकोज्ज्वला ।
अस्वप्ना असहा चैव अहन्त्री अक्षवृत्तिगा ॥ ३२५॥

आकाशवासिनी चैव आगतापि तथैव च ।
आधारसुस्थिता चैव अचलादलकाह्वला ॥ ३२६॥

आचाररचिताचार्या आजिमध्यप्रवेशिनी ।
आयसा आरकूटस्था आलस्यक्षयकारिणी ॥ ३२७॥

आशंसाकर्मशुभदा आषाढधारिणी तथा ।
आशावर्धनकर्त्री च आशाज्योतिर्विधायिनी ॥ ३२८॥

आषाढमासि पूज्या च आशंसास्वान्तमास्थिता ।
आसारसुखिता चैव आहोस्विदिति तर्किता ॥ ३२९॥

इडा इडतापत्रया ईषद्धास्यमिलन्मुखी ।
उड्डियानपीठगता उष्ट्रपुङ्गववाहिनी ॥ ३३०॥

उक्ता उतथ्याध्वजधृक् उद्धवप्रीतिकारिणी ।
उम्भिता उदिता चैव उन्नता उपरिस्थिता ॥ ३३१॥

इक्षुहस्ता तथाऽप्यूढा ऋतुकालसुखप्रदा ।
ऋतप्रिया तथा चैव ऋक्षमोक्षणकारिणी ॥ ३३२॥

ऋषिभिः सेविता चैव ऋष्यश्रृङ्गसमर्चिता ।
ओड्रपुष्पपूजिता च आधारचक्रवासिनी ॥ ३३३॥

मणिपुरवासिनी च स्वाधिष्ठाननिवासिनी ।
अनाहतानाहता च विशुद्धचक्रवासिनी ।
आज्ञाचक्रवासिनी च सहस्रदलवासिनी ॥ ३३४॥

इतीमां नाम्नामष्टादशशतीं यः पठति शृणोति पाठयति श्रावयति
वा स सर्वपापविमुक्तः, स धनी धनद इव, स कविः कविरिव,
स पण्डितो गुरुरिव, स रूपवान् जगन्मोहनो मन्मथ इव,
स राज्याधिकारी सुरराज इव, स तेजस्वी वह्निरिव,
स शासकः पितृपतिरिव, स सर्वतोगतिः पवमान इव,
स शौर्ययुक्तः सूर्य इव, स शीतलः शीतमरीचिरिव भवेत् ॥ ३३५॥

यः पठेत् प्रयतो विद्वान् पद्यार्धं पद्यमेव वा ।
ब्रह्महत्यादिपापेभ्यो मुक्त एव न सशयः ॥ ३३६॥

इमं स्तवं पठन् व्यासः कवीन्द्रत्वमुपागतः ।
वाल्मीकिरपि विप्रत्वं विश्वामित्रो जगाम सः ॥ ३३७॥

यद्यपि कुष्ठी कुनखी बधिरोऽन्धः पुनरति दुर्गतो
नानादुरवस्थाजडीकृतकलेवरो जपति जापयति वा सोऽपि पापं सर्वं

सन्दह्य प्रेमलक्षणां भक्तिमधिष्ठाय सर्वोपरि भ्राजते ॥ ३३८॥

सर्वाबाधाप्रशमनं धनधान्यविवर्धनम् ।
एतस्याध्ययनेनैव सत्यं सत्यं वदाम्यहम् ॥ ३३९॥

धर्मलिप्सुर्लभेद्धर्ममर्थेप्स्वर्थमवाप्नुयात् ।
कामं कामी लभेदाशु मुमुक्षुर्मोक्षमाप्नुयात् ॥ ३४०॥

सङ्कटे समनुप्राप्ते इदं स्वस्त्ययनं परम् ।
रणे वा राजसदने द्यूते च विजयप्रदम् ॥ ३४१॥

यस्तु नित्यं समाहितः सम्यगालपति पुनरालापयति
श्रृणुते श्रावयति वा
तद्दर्शनमात्रेण वादिनो निष्प्रभा भवन्ति
दूरादेव तेजःपुञ्जप्रतिहतचक्षुषो
योगिनी-डाकिनी-यक्ष-रक्ष-कूष्माण्ड-
भूत-प्रेत-पिशाच-हिंस्रजन्तवः पलायन्ते ॥ ३४२॥

तस्य वने वा गहने पोते वाताद्घूर्णिते वा न किञ्चिद्भयम् ।
न विद्युतो भयं न च दस्युतो भयं
न राजतो भयं नाऽनलतो भयं न केभ्योऽपि भयम् ॥ ३४३॥

स सर्वधर्मसम्पूर्णो नित्यानन्दमयस्तथा ।
इह लोके सुखं भुक्त्वा परत्र मयि लीयते ॥ ३४४॥

नापमृत्युर्न च ज्वरो नाऽशुभा बुद्धिरुन्मदा ।
न मात्सर्यं न लोभश्च तस्य पुंसोऽपि दुर्मतेः ॥ ३४५॥

इमा स्तुतिं पठति यः परां पुमान्
भवेत् स हिऽप्रथितकीर्तिरुत्तमः ।
विधूयऽतत्सकलकल्मषं व्रजेद्-
व्रजेश्वरी चरणपद्मभृङ्गताम् ॥ ३४६॥

॥ इति श्रीकृष्णयामले महातन्त्रे
श्रीमद्राधादेव्या नाम्नामष्टादशशती समाप्ता ॥

चतुर्विंशोऽध्यायः ॥ २४॥

Proofread by PSA Easwaran psaeaswaran at gmail

.. 1800 names of Radha ..

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLATEX 0.99996

on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*